वैराग्यप्रानकर

५५९

ॐस्वस्ति श्रीगणेशायनमः ॥ ॐदिक्कालाद्यनवच्छिन्नानंतचिन्मात्रमूर्तये
स्वानुभूत्यैकमानायनमःशांतायतेजसे॥१॥यांचिंतयाम्यनुदिनंमयिसावि
रक्तासाप्यन्यमिच्छतिनरंसनरोन्यसक्तः॥अस्मत्कृतेपिपरितुष्यतिकाचिद
न्याधिक्तांचतंचमदनंचइमांचमांच॥२॥बोद्धारोमत्सरग्रस्ताविभवः
स्मयदूषिताः॥अबोधोपहताश्चान्येजीर्णमंगेसुभाषितम॥३॥भ्रांतंदेश
मनेकदुर्गविषमंप्राप्तंनकिंचित्फलंत्यक्त्वाजातिकुलाभिमानमुचितंसे
वाकृतानिष्फला॥भुक्तंमानविवर्जितंपरगृहेसाशंकयाकाकवत्तृष्णे
जृंभसिपापकर्मपिशुनेनाद्यापिविश्राम्यसि॥४॥उत्खातंनिधिशंकया
क्षितितलंध्मातागिरेर्धातवोनिस्तीर्णःसरितांपतिर्नृपतयोयत्नेनसंतोषि

तः ॥ मंत्राराधनतत्परेण मनसा नीताः श्मशाने निशाः संप्राप्तस्थवराटकोपि न
मया तृष्णे सकामा भव ॥ ५ ॥ खलालापाः सोढाः कथमपि तदाराधनपरैर्निगृ-
ह्यान्तर्वाष्पं हसितमपि शून्येन मनसा ॥ कृतो वित्तस्तंभप्रतिहतधियामंजलिरपि
त्वमाशे मोघाशे किमपरमतो नर्तयसि माम् ॥ ६ ॥ आदित्यस्य गतागतैरहरहः सं-
क्षीयते जीवितं व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते ॥ दृष्ट्वा जन्मजरा-
वियोगमरणं त्रासो न चोत्पद्यते पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ ॥ ७ ॥
दीनां दीनमुखैः सदैव शिशुकैराकृष्टजीर्णांबुकां क्रोशद्भिर्विधुरैः क्षुधार्त्तिविधु-
रां पश्येन्न चेद्गेहिनीम् ॥ याच्ञाभंगभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं को देहीति
वदेत्स्वदग्धजठरस्यार्थे मनस्वी जनः ॥ ८ ॥ स्वादिष्टं मधुनोप्यनाक्षरसवयस्त्वस्व

त्यक्तंदैवीर्वागगृहीतात्मनारसवता तेनैवतस्मावयम् ॥ ऊढोयावदमीभवंतिधु
तयेभिक्षाहृतास्सक्तवस्तावहास्यकृतार्जनैर्नैर्हृधनैर्हृत्रिसमीहामहे ॥ ९ ॥ नि
वृत्ताभोगेच्छापुरुषबहुमानोविगलितस्समानास्स्वर्यातास्सपदिसुहृदोजी । स्वरितिपरलोके
वितसमाः ॥ शनैर्यष्ट्युत्थानंघनतिमिररुद्धेचनयनेअहोधृष्टःकायस्तदपिमर
णापायचकितः ॥ १० ॥ हिंसाशून्यमयत्नलभ्यमशनंधात्रामरुत्कल्पितंव्याल
नांपशवस्तृणांकुरभुजःस्तुष्टाःस्थलीशायिनः ॥ संसारार्णवलंघनक्षमधि
यांवृत्तिःकृतासानृणांयामन्वेषयतांप्रयांतिसततंसर्वेसमाप्तिंगुणाः ॥ ॥ ११ ॥
नध्यातंपदमीश्वरस्यविधिवत्संसारविच्छित्तयेस्वर्गद्वारकपाटपाटनपटुर्ध ।
र्मोपिनोपार्जितः ॥ नारीपीनपयोधरोरुयुगलंस्वप्नेपिनालिंगितंमातुःकेवल

मेव यौवनवनच्छेदैककुठारायितम्॥१२॥भोगा न भुक्ता वयमेव भुक्तास्तपो न तप्तं व
यमेव तप्ताः॥कालो न यातो वयमेव यातास्तृष्णा न जीर्णा वयमेव जीर्णाः॥१३॥
क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः सोढा दुःसहशीतवाततपनक्ले-
शा न तप्तं तपः॥ध्यातं वित्तमहर्निशं नियमितैः प्राणैर्न शंभोः पदं तत्तत्कर्म कृतं-
यदेव मुनिभिस्तैस्तैः फलैर्वंचितम्॥१४॥वलिभिर्मुखमाक्रांतं पलितैरंकितं
शिरः॥गात्राणि शिथिलायंते तृष्णैका तरुणायते॥१५॥येनैवांबरखंडेन संवी-
तो निशि चंद्रमाः॥तेनैव च दिवा भानुरहो दौर्गत्यमेतयोः॥१६॥अवश्यं यातार-
श्चिरतरमुषित्वापि विषया वियोगे को भेदस्त्यजति न जनो यत्स्वयममून्॥-
व्रजंतः स्वातंत्र्यादतुलपरितापाय मनसः स्वयं त्यक्ता ह्येते शमसुखमनंतं वि-

वै॰ श॰ ३

3

दूधते ॥१७॥ कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलो व्रणी पूयक्लिन्नः क्रि
मिकुलशतैरावृततनुः ॥ क्षुधाक्षामो जीर्णः पिठरिककपालार्पितगलः शुनीम
न्वेति श्वा हतमपि निहंत्येव मदनः ॥१८॥ भिक्षाशनं तदपि नीरसमेकवारं शय्या च भूः
परिजनो निजदेहमात्रम् ॥ वस्त्रं च जीर्णशतखंडमयी च कंथा हाहा तथापि विषया
न परित्यजंति ॥१९॥ स्तनौ मांसग्रंथी कनककलशावित्युपमितौ मुखं श्लेष्मागा
रं तदपि च शशांकेन तुलितम् ॥ स्रवन्मूत्रक्लिन्नं करिवरकरस्पर्धि जघनं मुहुर्निं
द्यं रूपं कविजनविशेषैर्गुरुकृतम् ॥२०॥ अजानन्माहात्म्यं पततिशलभस्तीव्रदह
ने स मीनोऽप्यज्ञानाद्बडिशयुतमश्नाति पिशितम् ॥ विजानंतोऽप्येते वयमिह विप ३
ज्जालजटिलान्न मुंचामः कामानहह गहनो मोहमहिमा ॥२१॥ फलमलमश

नायस्वादुपानायतोयंशयनमवनिपृष्ठेवाससेवल्कलेच॥धनलवमधु
पानभ्रांतसर्वेंद्रियाणामविनयमनुगंतुंनोत्सहेदुर्जनानाम्॥२२॥विपुलहृदयै
र्धन्यैःकैश्चिज्जगज्जनितंपुराविधृतमपरैर्दत्तंचान्यैर्विजित्यतृणंयथा॥इहहिभु
वनान्यन्येधीराश्चतुर्दशभुंजतेकतिपयपुरस्वाम्येपुंसांकएषमदज्वरः॥२३॥त्वंराजा
वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताःख्यातस्त्वंविभवैर्यशांसिकवयोदिक्षुप्रत
न्वंतिनः॥इत्थंमानदनातिदूरमुभयोरप्यावयोरंतरंयद्यस्मासुपराङ्मुखोसिवय
मप्येकांततोनिस्पृहाः॥२४॥अभुक्तायांयस्यांक्षणमपिनयातंनृपशतैर्भुवस्त
स्यालाभेकइवबहुमानःक्षितिभुजां॥तदंशस्याप्यंशेतदवयवलेशेपिपतयोवि
षादेकर्तव्येविदधतिजडाःप्रत्युतमुदम्॥२५॥मृत्पिंडोजलरेखयावलयितस्स

वै॰ श॰ ५

वैप्यथैतन्वणः स्वांगीकृत्यतमेव संयुगशतैराज्ञांगणा भुंजते ॥ दद्यस्तेददतोथवा
किमपरं त्वद्दोदरिद्राभूशेधिधिग्धिक्रूणामुरूणाधमाधैनलवं वांछंतितेभ्योपिये ॥ २६ ॥
ननदानविदानुगायनानचसत्येनरपत्तपानितिनः ॥ रूपमीहितमत्रकेवयंस्तनभाग
नमितानयोचितः ॥ २७ ॥ ददतुददतुगालीर्गालिमंतोभवंतोवयमपितदभावाद्गालि
दानेसमर्थाः ॥ जगतिविदितमेतद्दीयतेविद्यमानंददतुशशविषाणंयेमहात्यागि
नोपि ॥ २८ ॥ पुराविद्वत्तासीदमलिनधियांक्लेशहतयेगताकालेनासौविषयसुख
सिद्ध्यैविषयिणाम् ॥ इदानींसंप्रेक्ष्यक्षितितलभुजः शास्त्रविमुखानहोकष्टंसापि
प्रतिदिनमधोधः प्रविशति ॥ २९ ॥ सजातः कोप्यासीन्मदनरिपुणामूर्ध्निधवलंक
पालंयस्योच्चैर्विनिहितमलंकारविधये ॥ नृभिः प्राणत्राणप्र[illegible]वणमतिभिः कैश्चि

६

दधुनाममड्डिकः सा मयमत्तलदर्पज्वरभरः ॥२६॥ अशीमहि वयं भिक्षामाशावासो
वसीमहि ॥ शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥२७॥ अर्थानामीशिषे त्वं वय
मपि च गिरामीश्महे यावदित्थं शूरस्त्वं वादिदर्पज्वरशमनविधावक्षयं पाटवं नः ॥
सेवंते त्वां धनाढ्या मतिमलहतये मामपि श्रोतुकामा मय्यप्यास्था न चेत्तत्त्वयि
मम सुतरामेष राजन्गतोस्मि ॥२८॥ यदा किंचिज्ज्ञोहं द्विप इव मदांधः समभवं त
दा सर्वज्ञोस्मीत्यभवदवलिप्तं मम मनः ॥ यदा किंचित्किंचिद्बुधजनसकाशादधि
गतं तदा मूर्खोस्मीति ज्वर इव मदो मे व्यपगतः ॥२९॥ माने म्लायिनि खंडिते च वसुनि
व्यर्थे प्रयातेर्थिनि क्षीणे बंधुजने गते परिजने नष्टे शनैर्यौवने ॥ युक्तं केवलमेत
देव सुधियां यज्जह्नुकन्यापयः पूतग्रावगिरींद्रकंदरदरीकुंजे निवासः क्वचित् ॥ ॥१४॥

वैं. श. ५
5

परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा प्रसादं किं नेतुं विशसि हृदय क्लेशक
लिलम्॥ प्रसन्ने त्वय्येव स्वयमुदितचिंतामणिगुणो विविक्तः संकल्पः किमभिल
(लं: कं ल ट)
षितं पुष्यति न ते॥३५॥ अतिक्रांतः कालो लटभललनाभोगसुभगो भ्रमंतः श्रांताः
स्मः सुचिरमिह संसारसरणौ॥ इदानीं स्वःसिंधोस्तटभुवि समाक्रंदनगिरः सुता
रैः फूत्कारैः शिव शिव शिवेति प्रतनुमः॥३६॥ अमीषां प्राणानां तुलितनलिनी
पत्रपयसां कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितम्॥ यदाढ्यानामग्रे द्रविण
मदनिःसंज्ञमनसां कृतं वीतव्रीडैर्निजगुणकथापातकमपि॥३७॥ नायातः सम
योरहस्य मधुना निद्राति नाथो यदि स्थित्वा द्रक्ष्यति कुप्यति प्रभुरिति द्वारेषु येषां ५
वचः॥ चेतस्तानपहाय याहि पदवीं देवस्य विश्वेशितुर्निर्दौवारिकनिर्दयोक्त्यप॥

अपगतो रुद्रयस्यां
पदवीं स

स्थंनिःसीमसंपित्पदं ॥४०॥ भ्रातः कालमहोरगनः सन्दपतिस्स्रामेतचक्रंचतत
पार्श्वेतस्यचसाविदग्धपरिषन्नाश्वंइविंबाननाः ॥ उज्जिकस्यचराजपुत्रनिव
हस्तेवंदिनस्ताः कथाः सर्वंयस्यचप्राग्दगात्स्मरतिपदंदैवायतस्तेनमः ॥ स्व
वयंचेभोजानर्घ्यरपरिगताएववलन्तेसमंयैसंहृष्टाः स्मरतिविषयतांतेपि
हिगताः ॥ इदानीमेतेस्मः प्रतिदिवसमासन्नपतनागतात्स्वल्पावस्थांसिकति
लनदीतीरतरुभिः ॥४१॥ यत्रानेकः क्वचिदपिगृहेतत्रचतिष्ठत्यथैकोयत्राप्येक
स्तद्नुबहवस्तत्रचांतेपिनैकः ॥ इत्थंचेमौरजनिदिवसौदोलयन्द्वाविवाक्षौ
कालः काल्यासहबहुकलः क्रीडतिप्राणिशारैः ॥४२॥ तपस्यनः संतः किमुतनि
वसामः सुरनदीगुणोदारान्दारानुतपरिचरामः सविनयं ॥ पठामः शास्त्रौघा

वै. श.
८

नृत्तविविधकाव्यामृतरसास्त्रविग्नाः किं कुर्मः कतिपयनिमेषायुषि जने ॥ ४४ ॥ अहौ
वा हारे वा कुसुमशयने वा दृषदि वा मणौ वा लोष्ठे वा बलवति रिपौ वा सुहृदि वा ॥ तृणे
वा स्त्रैणे वा मम समदृशो यांतु दिवसाः कदा पुण्यारण्ये शिव शिव शिवेति प्रलपतः ॥ ४
गंगातीरे हिमगिरिशिलाबद्धपद्मासनस्य ब्रह्मज्ञानाभ्यसनविधिना योगनिद्रां गत-
स्य ॥ किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशंकाः कंडूयंते जरठहरिणाः स्वांगमंगे मदीये ॥ ४४ ॥
स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने सुखासीनाः शांतध्वनिषु रजनीषु द्यु-
सरितः ॥ भवाभोगोद्विग्नाः शिव शिव शिवेत्यार्तवचनाः कदा स्यामानंदोद्गतबहुल-
बाष्पाकुलदृशः ॥ ४५ ॥ अनल्पं जल्पंतः कति वत गता नो यमपुरं पुरस्तादस्माकं वि- ८
हतनयना व्याप्तवदनाः ॥ प्रतीतापायेप्येवं न हि निजहितं चेतसि वयं वहामो हा मोहा

ह्विषयविषजातादवसिताः ॥ ४६ ॥ शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं म
हीध्राडुत्तुंगादवनिमवनेश्चापिजलधिम् ॥ अधोधोगंगावह्वयमुपगतानूनमथवा
विवेकभ्रष्टानांभवतिविनिपातःशतमुखः ॥ ४७ ॥ महादेवोदेवःसरिदपिचसैवाम
रसरिद्गुहाचैवागारंवसनमपिताएवहरितः ॥ सुहृद्धाकालोयंव्रतमिदमदैन्यव्र
तमियत्कियद्वावक्ष्यामोवटविटपएवास्तुदयिता ॥ ४८ ॥ आशानाममनदीमनोरथज
लातृस्नातरंगाकुलारागग्राहवतीवितर्कविहगाधैर्यद्रुमध्वंसिनी ॥ मोहावर्त।
सुदुस्तरातिगहनाप्रोत्तुंगचिंतातटीतस्याःपारगताविशुद्धमनसोनंदंतियोगी।
श्वराः ॥ ४९ ॥ आसंसारात्त्रिभुवनमिदंचिन्वतांताततादृङ्नैवास्माकंनयनपदवींश्रोत्र
वर्त्मागतोपि ॥ योयंधत्तेविषयकरिणीगाढहृढाभिमानक्षीवस्यांतःकरणकरिण

वै॰ श॰

स्सैंयमालानलीलाम्॥५०॥योवर्धंतेधनपतिपुरःप्रार्थनादुःखभाजोयेचाल्पत्वंदध।
तिविषयाक्षेपपर्यस्तबुद्धेः॥तेषामंतःस्फुरितहसितंवासराणांस्मरेयंध्यानच्छेदेशिख
रिकुहरग्रावशय्यानिषण्णः॥५१॥विद्यानाधिगताकलंकरहितावित्तंनचोपार्जितंशु
श्रूषापिसमाहितेनमनसापित्रोर्नसंपादिता॥आलोलायतलोचनायुवतयःस्वप्ने
पिनालिंगिताःकालोयंपरपिंडलोलुभतयाकाकैरिवप्रेरितः॥५२॥वज्राग्रैर्नविदा
रिताःकरिघटानोद्वेजितावैरिणस्तन्व्याविपुलेनितंबफलकेनोक्रीडितंलीलया।
नोज्झंगिरिराजनिर्झरजरज्ञांकारिगंगापयःकालोयंपरपिंडलोलुभतयाकाके
रिवप्रेरितः॥५३॥वितीर्णेसर्वस्वेतरुणकरुणापूर्णहृदयाःस्मरंतःसंसारेविगुण ८
परिणामावधिगतम्॥वयंपुण्यारण्येपरिणतशरच्चंद्रकिरणास्त्रियामानेष्यामोह

रचरणाविवेकशरणाः ॥५४॥ वयमिहपरितुष्टावल्कलैस्त्वंचलक्ष्म्यासमइहपरि
तोषोनिर्विशेषोविशेषः ॥ सतुभवतुदरिद्रोयस्यतृष्णाविशालामनसिचपरितुष्टे
कोर्थवान्कोदरिद्रः ॥५५॥ यदेतत्स्वाछंद्यंविहरणमकार्पण्यमशनंसहार्यैःसं
वासःश्रुतमुपशमैकव्रतफलम् ॥ मनोमंदस्पंदंबहिरपिचिरस्यापिविमृशन्
ज्ञानेकस्यैषापरिणतिरुदारस्यतपसः ॥५६॥ पाणिःपात्रंपवित्रंभ्रमणपरिगतं
भैक्ष्यमक्षय्यमन्नंविस्तीर्णंवस्त्रमाशादशकमचपलंतल्पमस्वल्पमुर्वी ॥ येषांनिः
संगतांगीकरणपरिणतिस्स्वात्मसंतोषिणस्तेधन्याःसंन्यस्तदैन्यव्यतिकरनिक
राःकर्मनिर्मूलयंति ॥५७॥ भिक्षाकामदुघाधेनुःकंथाशीतनिवारिणी ॥ अच
लाचशिवेभक्तिर्विभवैःकिंप्रयोजनं ॥५८॥ दुराराध्याश्चामीतुरगचलचित्ताःक्षि

वै॰ श॰ ८

त्रिभुजोवयंचस्थलेख्याः स्मरमदृतिपदेष्वद्धमनसः॥जरादेहंमृत्युर्हरतिदयितंजीवि
तमिदंसखेनान्यच्छ्रेयोजगतिविदुषोन्यत्रतपसः॥५९॥भोगामेघवितानमध्यविलस
त्सौदामिनीचंचलाआयुर्वायुविघट्टिताब्जपटलीलीनांबुवद्भंगुरम्॥लोलायौव
नलालनातनुभृतामित्याकलय्यद्रुतंयोगेधैर्यसमाधिसिद्धिसुलभेबुद्धिंविदध्वं
बुधाः॥६०॥पुण्येग्रामेवनेवामहतिसितपटच्छन्नपालीकपालीमादायन्यायग
र्भद्विजहुतहुतभुग्धूम्रधूम्रोपकंठम्॥द्वारंद्वारंप्रविष्टोवरमुदरदरीपूरणायक्षुधा
र्तोमानीप्राणैःसनाथोनपुनरनुदिनंतुल्यकुल्येषुदीनः॥६१॥चंडालःकिमयंद्वि
जातिरथवाशूद्रोथकिंतापसः किंवातत्त्वनिवेशपेशलमतिर्योगीश्वरःकोपिकि
म्॥इत्युत्पन्नविकल्पजल्पमुखरैःसंभाष्यमाणाजनैर्नक्रुद्धाःपथिनैवतुष्टमन॥ ८

सोयंनित्यंयोगिनः ॥९५॥ एतस्माद्विरमेंद्रियार्थगहनादायासकादाश्रयाच्छ्रे
यैमार्गमशेषदुःखदहनव्यापारदक्षंक्षणात् ॥ स्वास्थ्यंतावदुपैहिसंत्यजनिजांक
ल्लोललोलांगतिंमाभूयोभजभंगुरांभवरतिंचेतःप्रसीदाधुना ॥९६॥ पुण्यैर्मूलफ
लैःप्रियांप्रणयिनींवृत्तिंकुरुष्वाधुनाभूशय्यांतृणवल्कलैरपमलैरुत्तिष्ठयामो
वनम् ॥ क्षुद्राणामविवेकमूढमनसांयत्रेश्वराणांसदावित्तव्याधिविकारविह्वल
धियांनामापिनश्रूयते ॥९७॥ मोहंमार्जयितामुपार्जयरतिंचंद्रार्धचूडामणौचेतः
स्वर्गतरंगिनीतटभुवांसंसर्गमंगीकुरु ॥ कोवावीचिषुबुद्बुदेषुचतडिल्लेखासुच
स्त्रीषुचज्वालाग्रेषुचपन्नगेषुचसरिद्वेगेषुचप्रत्ययः ॥९८॥ अग्रेगीतंसरसकव
यःपार्श्वतोदाक्षिणात्याःपृष्ठेलीलावलयरणितंचामरग्राहिणीनाम् ॥ यद्यस्त्येवं।

वै॰ श॰ ५१

ऊरुभवरसास्वादनेलंपटत्वं नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥९६॥ विर
मत बुधा योषित्संगात्सुखात्क्षणभंगुरात्कुरुत करुणाप्रज्ञामैत्रीवधूजनसंगमम् ॥
नखलु नरके हाराक्रांतं घनस्तनमंडलं शरणमथवा श्रोणीबिंबं रणन्मणिमेखलं ॥९७॥
प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं काले शक्त्या प्रदानं युवतिज
नकथामूकभावः परेषाम् ॥ तृष्णास्रोतोविभंगो गुरुषु च विनयः सर्वभूतानुकंपा सा
मान्यः सर्वशास्त्रेष्वनुपहतमतिः श्रेयसामेष पंथाः ॥९८॥ मातर्लक्ष्मि भजस्व कंचिद
परं मत्सार्थिनी मा स्म भूर्भोगेभ्यः स्पृहयालवो न हि वयं का निस्पृहाणामसि ॥ सद्यः
स्यूतपलाशपत्रपुटिकापात्रे पवित्रीकृते भिक्षासक्तुभिरेव संप्रति वयं वृत्तिं समी
हामहे ॥९९॥ यूयं वयं वयं यूयमित्यासीन्मतिरावयोः ॥ किंजातमधुना येन यूयं यूयं

५

यं वयं वयम् ॥७०॥ वयमेव पुरा हृद्ये हृद्यमेव पुरा वयम् ॥ इदानीमर्थसंबंधात् हृद्ये हृ
द्यं वयं वयम् ॥७१॥ रम्यं हर्म्यतलं नवा वसतये श्रव्यं न गेयादिकं किं वा प्राणसमासमाग
मसुखं नैवाधिकं प्रीतये ॥ किं तु भ्रांतपतंगपक्षपवनव्यालोलदीपानलच्छायाचंचल
माकलय्य सकलं संतो वनांतं गताः ॥७२॥ किं कंदाः कंदरेभ्यः प्रलयमुपगता निर्झ
रा वा गिरिभ्यः प्रध्वस्ता वा तरुभ्यः सरसफलभृतो वल्कलिन्यश्च शाखाः ॥ वीक्ष्यंते य
न्मुखानि प्रसभमपगतप्रश्रयाणां खलानां दुःखोपात्ताल्पवित्तस्मयवशपवनान
र्तितभ्रूलतानाम् ॥७३॥ किं पाकानवसंति भूधरसरित्कुंजेषु मूलानि वा किं वा जीव
नमेतदेव विहितं यात्रैव नान्यत्क्वचित् ॥ येन श्रीमदमोहमूढमनसां स्थित्वाग्रतो।
भ्रूभंगं नाम्ना सोत्कंपकदर्थितानातुरपदा देहीति वाग्वच्यते ॥७४॥ गंगातरंगभरणीकरशी

वै॰ श॰ १० 10

तलानि विद्याधराध्युषितचारुशिलातलानि ॥ स्थानानि किं हिमवतः प्रलयं गता
नि येनावमानपरपिंडरता मनुष्याः ॥८५॥ यदा मेरुः श्रीमान्निपतति युगांताग्निदलित
स्समुद्राः शुष्यंति प्रचुरमकरग्राहनिलयाः ॥ धरा गच्छत्यंतं धरणिधरपादैरपि धृता
शरीरे का वार्ता करिकलभकर्णाग्रचपले ॥८६॥ एकाकी निःस्पृहः शांतः पाणिपात्रो
दिगंबरः ॥ कदाहं शंभो भविष्यामि कर्मनिर्मूलनक्षमः ॥८७॥ प्राप्ताः श्रियः सकलका
मदुघास्ततः किं दत्तं पदं शिरसि विद्विषतां ततः किं ॥ संतर्पिताः प्रणयिनो विभवैस्त
तः किं कल्पं स्थितं तनुभृतां तनुभिस्ततः किं ॥८८॥ भक्ष्यं भुक्तं ततः किं कदशनम
थवा वासरांते ततः किं कौपीनं वा ततः किं सितममलतरं पट्टकौशं ततः किं ॥ एको १०
भ्रांतस्ततः किं करितुरगरथैः प्राप्तो वा ततः किमेकां भार्या ततः किं शतगुणगणिताः

कोटिरेका ततः किम्॥७४॥तस्मादनंतमजरंपरमंविकासितद्ब्रह्मचिंतयकिमेभिर ॥८॥
सद्विकल्पैः॥यस्यानुषंगिणइमेभुवनाधिपत्यभोगादयःकृपणलोकमताभवंति॥
भक्तिर्भवेमरणजन्मभयंहृदिस्थंस्नेहोनबंधुषुनमन्मथजाविकाराः॥संसारदो
षरहिताविजनावनांतावैराग्यमस्तिकिमतःपरमर्थनीयम्॥७५॥पातालमावि
शसियासिनभोविलंघ्यदिङ्मंडलंभ्रमसिमानसचापलेन॥भ्रांत्यापिजातु
विमलंकथमात्मनिष्ठंनब्रह्मसंस्मरसिनिर्वृतिमेषियेन॥७६॥रात्रिःसैवपुनः
सएवदिवसोमिथ्यामुदाजंतवोधावंत्युद्यमिनस्तथैवनिभृतप्रारब्धतत्तत्क्रियाः
व्यापारैःपुनरुक्तदोषविषमैरित्थंविधेनामुनासंसारेणकदर्थिताःकथमहो
मोहान्नलज्जामहे॥७७॥महीशय्याशायीविपुलमुपधानंभुजलतावितानं

वै॰ श॰ ११

वाकाशो व्यजनमनुकूलोयमनिलः ॥ स्फुरद्दीपश्चंद्रो विरतिवनितासंगमुदितः सुखं
शांतः शेते मुनिरतनुभूतिर्नृप इव ॥८४॥ त्रैलोक्याधिपतित्वमेव विरसं यस्मिन्महाशा
सने तल्लब्ध्वासनवस्त्रमानघटने भोगे रतिं मा कृथाः ॥ भोगः कोपि स एक एव परमो नि
त्योदितो जृंभते यत्स्वादाद्विरसा भवंति विभवास्त्रैलोक्यराज्यादयः ॥८५॥ किं वेदैः स्मृ
तिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः स्वर्गद्वारकुटीनिवासफलदैर्यज्ञक्रियाविभ्र
मैः ॥ मुक्त्वैकं भवदुःखभाररचनाविध्वंसकालानलं स्वात्मानंदपदप्रवेशकठिनं शेषैर्व
णिग्वृत्तिभिः ॥८६॥ आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्रीरर्थाः सं
कल्पकल्पा घनसमयतडिद्विभ्रमा भोगभंगाः ॥ कंठाश्लेषोपभोगं तदपि च न चिरं यत्प्रिया ११
भिः प्रणीतं ब्रह्मण्यासक्तचित्ता भवत भवभयांभोधिपारं तरीतुम् ॥८७॥ ब्रह्मांडमंडली

किमित्यनुगः

मात्रेंकिंलोभायमनस्विनः॥शफरीस्फुरितेनाब्धेःक्षुब्धताजातुजायते॥८८॥यदासी
दज्ञानंस्मरतिमिरसंस्कारजनितंतदादृष्टंनारीमयमिदमशेषंजगदिति॥इदानीमस्मा
कंपटुतरविवेकाञ्जनजुषांसमीभूतादृष्टिस्त्रिभुवनमपिब्रह्ममनुते॥८९॥रम्याश्चंद्र
कौ स्मीता
मरीचयस्तृणवतीरम्यावनांतस्थलीरम्यंसाधुसमागमसुखंरम्याःकवीनांकथाः
कोपोपाहितबाष्पबिंदुतरलंरम्यंप्रियायामुखंसर्वंरम्यमनित्यतामुपगतेचित्तेनकिंचि
त्पुनः॥९०॥भिक्षाशीजनमध्यसंगरहितःस्वायत्तचेष्टःसदाहानादानविविक्तमार्गनि
रतःकश्चित्तपस्वीजनः॥रथ्याकीर्णविशीर्णजीर्णवसनैःसंस्यूतकंथाधरोनिर्मानो
निरहंकृतिःशमसुधाभोगैकबद्धस्पृहः॥९१॥मातर्मेदिनितातमारुतसखेतेजःसु
बंधोजलभ्रातर्व्योमनिबद्धएषभवतामग्रेप्रणामांजलिः॥युष्मत्संगवशोपजातसुकृ

वै. श.
१२

तोद्रेकस्फुरन्निर्मलज्वालापास्तसमस्तमोहमहिमालीयेपरब्रह्मणि ॥५२॥ यावत्स्वस्थमि
दंशरीरमरुजंयावज्जरादूरतोयावच्चेंद्रियशक्तिरप्रतिहतायावत्क्षयोनायुषः ॥ आत्मश्रेय
सितावदेवविदुषाकार्यःप्रयत्नोमहान्संदीप्तेभवनेतुकूपखननंप्रत्युद्यमःकीदृशः ॥५३॥
नाभ्यस्ताभुविवादिवृंददमनीविद्याविनीतोचिताखड्गाग्रैःकरिकुंभदंतदलनैर्नाकंननी
तंयशः ॥ कांताकोमलपल्लवाधररसःपीतोनचंद्रोदयेतारुण्यंगतमेवनिष्फलतयाशू
न्यालयेदीपवत् ॥५४॥ जीर्णाएवमनोरथाःस्वहृदयेयातंचतद्यौवनंहंतांगेषुगुणाश्च
वंध्यफलतांयातागुणज्ञैर्विना ॥ किंयुक्तंसहसाभ्युपैतिबलवान्कालःकृतांतोऽक्षमी
ज्ञातंमधुसूदनांघ्रियुगलंदीनस्यकल्याणगतिः ॥५५॥ ज्ञानंसतांमानमदादिनाशनंकेषां
चिदेतन्मदमानकारणं ॥ स्थानंविविक्तंयमिनांविमुक्तयेकामातुराणामपिकामका १२

दीनस्यत्रिपुरा
तकांघ्रियुग
लंकल्याणि
नामगतिः

मकारणम् ८६ तृषायामुष्णायां स्वयमपिबतिसलिलंस्वादुसुरभिक्षुधार्तःसन्शालीन्कवलयतिशाकादिवलिता
न् प्रदीप्तेरागाग्नौसुदृढतरमाश्लिष्यतिवधूंप्रतीकारोव्याधेःसुखमितिविपर्यस्यतिजनः ८७ स्नात्वागा
ङ्गैःपयोभिःशुचिकुसुमफलैरर्चयित्वाविभोत्वांध्येयेध्यानेनिवेश्यक्षितिधरकुहरग्रावपर्यङ्कमूले आ
त्मारामःफलाशीगुरुवचनरतस्त्वत्प्रसादात्स्मरारेदुःखंमोक्ष्येकदाहंतवचरणरतोध्यानमार्गैक
बुद्धेः ८८ शय्याशैलशिलागृहंगिरिगुहावस्त्रंतरूणांत्वचःसारङ्गाःसुहृदोननुक्षितिरुहांवृत्तिःफ
लैःकोमलैः येषांनैर्झरमम्बुपानमुचितंरत्येवविद्याङ्गनामन्येतेपरमेश्वराःशिरसियैर्बद्धोनसेवाञ्ज
लिः ८९ सत्यामेवत्रिलोकीसरितिहरशिरश्चुम्बिनीविच्छटायांसद्वृत्तिंकल्पयन्त्यांवटविटपिभवैर्वल्कलैःस
त्फलैश्च कोयंविद्वान्विपत्तिज्वरजनितरुजातीवदुःखासिकानांवक्त्रंवीक्षेतदुःस्थेयदिहिनबिभृयात्स्वेकुटु
म्बेनुकम्पाम् ९० उद्यानेषुविचित्रभोजनविधिस्तीव्रातितीव्रंतपःकौपीनावरणंसुवस्त्रममितंभिक्षाटनं
मण्डनम् आसन्नंमरणंचमङ्गलसमंयस्यांसमुत्पद्यतेतांकाशींपरिहृत्यहन्तविबुधैरन्यत्रकिंस्थीय
ते ९१ नायंतेसमयोरहस्यमधुनानिद्रातिनाथोयदिस्थित्वाद्रक्ष्यतिकुप्यतिप्रभुरितिद्वारेषुये
षांवचः चेतस्तानपहाययाहिभवनंदेवस्यविश्वेशितुर्निर्दौवारिकनिर्दयोक्त्यपरुषंनिःसीमशर्मप्रद

वै॰ श॰ मू १०२ प्रियसखिविपद्दण्डप्रातपरंपरापरिचये चिन्ताचक्रे विधाय विधिः खलः ॥ (बले)
१२ ॥ मृदमिवबलात्पिण्डीकृत्यप्रगल्भकुलालवद्भ्रमयतिमनोनोजानीमः किमत्रविधास्यति १०३
रेकन्दर्प करंकदर्थयसि किंकोदण्डटङ्कारवैः रेरेकोकिल कोमलैः कलरवैः किंत्वंवृथाजल्पसि ।
13 मुग्धेस्निग्धविदग्धमुग्धमधुरैर्लोलैः कटाक्षैरलंचेतश्चुम्बितचन्द्रचूडचरणध्यानामृतंवर्त्तते ।
१०४ महेश्वरेवाजगतामधीश्वरेजनार्दनेवाजगदन्तरात्मनि नचास्तिभेदप्रतिपत्तिरत्र
मेतथापिभक्तिस्तरुणेन्दुशेखरे १०५ कौपीनंशतखण्डजर्जरतरंकन्थापुनस्तादृशी
निश्चिन्तंसुखसाध्यभैक्ष्यमशनंशय्याश्मशानेवने मित्राऽमित्रसमानताऽतिविमलाचि-
न्ताऽथशून्यालयेध्वस्ताऽशेषमदप्रमादमुदितोयोगीसुखंतिष्ठति १०६ । भोगा
भङ्गुरवृत्तयोबहुविधास्तैरेवचायंभवस्तत्कस्येवकृतेपरिभ्रमतरेलोकाः कृतंचेष्टितैः
॥ आशापाशशतोपशान्तिविशदंचेतः समाधीयतांकामोच्छित्तिवशेस्वधामनि-
यदिश्रद्धेयमस्मद्वचः १०७ ॥ धन्यानांगिरिकन्दरेनिवसतांज्योतिः परंध्यायता-
मानन्दाश्रुजलंपिबन्तिशकुनानिःशङ्कमङ्केशयाः अस्माकंतुमनोरथोपरचितप्रासादवा- १२

पीतस्त्रीशकाननकेलिकौतुकजुषामायुः परं क्षीयते ॥ १०४ ॥ आक्रान्तं मरणेन जन्म
जरया विद्युच्चलं यौवनं संतोषो धनलिप्सया शमसुखं प्रौढाङ्गनाविभ्रमैः ॥ लोकैर्मत्स
रिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनैरस्थैर्येण विभूतयोऽप्युपहता ग्रस्तं न किं केन वा ॥ १०५
आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वारा इ
व व्यापदः ॥ जातं जातमवश्यमाशु विवशं मृत्युः करोत्यात्मसात्तत्किं नाम निरंकुशेन
विधिना यन्निर्मितं सुस्थिरम् ॥ १०६ ॥ कृच्छ्रेणामेध्यमध्ये नियमिततनुभिः स्थीयते
गर्भवासे कान्ताविश्लेषदुःखव्यतिकरविषमे यौवने विप्रयोगः ॥ नारीणामप्यवज्ञा
विलसति वचने वृद्धभावेऽप्यसाधुः संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति
किंचित् ॥ १०७ ॥ आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं हृतं तस्यार्धस्य परस्य चार्धं

मपरंबालत्ववृद्धत्वयोः॥शोषंव्याधिवियोगदुःखमरणैर्भूपालसेवारसैर्जीवेवारितरंग
बुद्बुदसमेसौख्यंकुतःप्राणिनाम्॥१८॥ब्रह्मज्ञानविवेकिनोमलधियःकुर्वंत्यहोदुष्क
रंयन्मुंचंत्युपभोगभांज्यपिधनान्येकांततोनिस्पृहाः॥नप्राप्तानिपुरानसंप्रतिनचप्राप्तौ
दृढःप्रत्ययोवांछामात्रपरिग्रहाण्यपिपरंत्यक्तुंनशक्तावयम्॥१९॥व्याघ्रीवतिष्ठ
तिजरापरितर्जयंतीरोगाश्चशत्रवइवप्रहरंतिगात्रे॥आयुःपरिस्रवतिभिन्नघटादिवां
भोलोकोनचात्महितमाचरतीतिकष्टम्॥२०॥भोगास्तुंगतरंगवंचलतराःप्राणाः
क्षणध्वंसिनःस्तोकान्येवदिनानियौवनसुखंप्रीतिःप्रियेषुस्थिराजातंजातमव
श्यमाशुविवशंमृत्युःकरोत्यात्मसात्तत्किंनामनिरंकुशेनविधिनायन्निर्मितंसुस्थि १५
रं॥२१॥स्रजतितावदशेषगुणाकरंपुरुषरत्नमलंकरणंभुवः॥तदपितत्क्षणभंगि

करोतिचेदहहहकष्टमपंडितताविधेः ॥११२॥ क्षणंबालोभूत्वाक्षणमपियुवा
कामरसिकः क्षणंवित्तैर्हीनः क्षणमपिचसंपूर्णविभवः ॥ जराजीर्णैरंगै
र्नटइववलीमंडिततनुर्नरः संसारांतेविशतियमधानीजवनिकाम् ॥ ११३

इतिश्रीराजाभर्तृहरिणाविरचितंवैराग्यशतकंसंपूर्णम् ॥ ॥

वरंजलनिपानेचज्वालापर्वतपातनं नविवेकविहीनेनमूर्खेनसहसंगमः

पि